'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 4th Semester Examination, 2023

## CC8-SANSKRIT

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

### विभागः– क

1. संस्कृतभाषायां देवनागरीलिप्यां च एकस्य उत्तरं देयम् – 12×1 = 12

(क) सामाजिकाचरणविधिविषये मनुसंहितायाः द्वितीयाध्याये यदुपदिष्टं तत्सर्वम् आलोचयत।

(ख) को नाम संस्कारः ? मनुसंहितायाः द्वितीयाध्याये द्विजातीनां संस्कारविषये यदुपदिष्टं तत्सर्वं सविस्तरम् आलोचयत।

2. एकस्य श्लोकस्य व्याख्या कार्या संस्कृतभाषायां देवनागरीलिप्याञ्च। 6×1 = 6

(क) न जातु कामः कामानामुपभोगेन शाम्यति।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्धते॥

(ख) वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च॥

3. टिप्पणी लेख्या संस्कृतभाषया देवनागरीलिप्या च (द्वयोः) 3×2 = 6

यज्ञोपदेशः, सदाचारः, एकादशेन्द्रियाणि, आचार्यः,

4. संक्षिप्तोत्तरं लेखनीयं संस्कृतभाषया नागरीलिप्या चः (त्रयाणाम्) 2×3 = 6

(क) उपाध्यायः कः उच्यते ?

(ख) कः स्वाध्यायः ?

(ग) का खलु श्रुतिः ? का च स्मृतिः?

(घ) के तावत् पाकयज्ञाः?

### विभागः– ख

5. संस्कृतभाषया नागरीलिप्या च एकस्य प्रश्नस्य उत्तरं लेखनीयम् – 12×1 = 12

(क) याज्ञवल्क्यस्य मतमवलम्ब्य ऋणादानविषयं सविशदमालोचयत।

(ख) कति प्रमाणानि याज्ञवल्क्येन स्वीकृतानि ? तानि विस्तरेण आलोच्यन्ताम्।

6. संस्कृतभाषायां नागरीलिप्यां च व्याख्या कार्या (एकस्य) – 6×1 = 6

(क) दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते।
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥

(ख) अपश्यता कार्यवशात् व्यवहारान् नृपेण तु।
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ॥

7. संस्कृतभाषया नागरीलिप्या च टिप्पणी लेख्या (द्वयोः) 3×2 = 6

कूटसाक्षी, प्राड्विवाकः, उपनिधिः, साहसः

8. संस्कृतभाषायां नागरीलिप्यां च अतिसंक्षिप्तोत्तरं देयम् (त्रयाणाम्) 2×3 = 6

(क) स्तेयः कः ?

(ख) को नाम व्यवहारः ?

(ग) कः उच्यते दायः ?

(घ) किं नाम स्त्रीधनम् ?

(ङ) को नाम क्षेत्रजपुत्रः ? श्लोकेन सह लिखत।

——×——